मस्वरी। ई, चुक्तः। यद्वयान्तोऽयमित्येके। अभिषवः स्नानं मन्थनं पीड़नं सन्धानञ्च। इति दुर्गादासः॥

चुचुः, पुं, छुच्छुन्दरिः। इति हारावली। ८३॥ ( सङ्करजातिविशेषः। यथा, मनुः। १०। ४८।
"मेदान्ध्रचुचुमद्गूनामारण्यपशुहिंसनम्॥"
"चुचुर्मद्गुश्च वैदेहकवन्दिस्त्रियोर्ब्राह्मणेन जातौ वौधायनेनोक्तौ बोद्धव्यौ।" इति तट्टीकायां कुल्लूकभट्टः॥ व्याकरणोक्तप्रत्ययविशेषः। स तु प्रसिद्धार्थे भवति। यथा, विद्यया वित्तो विद्याचुचुः। इति सिद्धान्तकौमुदी॥ स्त्री, उद्भिज्जविशेषः। चेचुना इति लोके। नाड़ीचवत्। अस्या पर्य्याया गुणाश्च यथा,—
"चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका।
चुचुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"सुवर्च्चलाया चुञ्चोर्वा लोणिकाया रसैरपि॥"
इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

चुचुरी, स्त्री, ( चुचुरिव रातीति। रा+कः। स्त्रियां ङीप्।) तिन्तिड़ीद्यूतम्। इति त्रिकाण्डशेषः॥ कौँड़वीचिर खेला इति भाषा॥

चुचुली, स्त्री, ( चुचुरी। रस्य लत्वम्।) तिन्तिड़ीकास्थिभिर्द्यूतक्रीड़ा। इति हारावली। ६२॥

चुट, तुच्छने। इति कविकल्पद्रुमः। ( भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। चोटति नदी ग्रीष्मे। इति दुर्गादासः॥

चुट, इ तुच्छने। इति कविकल्पद्रुमः॥ ( भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। इ, चुण्ट्यते नद्या ग्रीष्मे। इति दुर्गादासः॥

चुट, इ क छेदे। इति कविकल्पद्रुमः॥ ( चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, चुण्टयति धान्यं लोकः। इति दुर्गादासः॥

चुट, क शि छेदे। इति कविकल्पद्रुमः। ( चुरां-तुदांच-परं-सकं-सेट्।) क, चोटयति। शि, चुटति अचुटीत्। इति दुर्गादासः॥

चुट्ट, क तुच्छने। इति कविकल्पद्रुमः॥ ( चुरां-परं-अकं-सेट्।) टद्वयान्तः। पञ्चमस्वरी। एकटकार इति रामः। तुच्छनमल्पीभावः। क, चुट्टयति नदी ग्रीष्मे। इति दुर्गादासः॥

चुड, इ तौक्ष्ण्ये। इति कविकल्पद्रुमः॥ ( भ्वां-परं-अकं-सेट्।) इ, चुण्ड्यते। तौक्ष्ण्यमल्पीभावः। इति दुर्गादासः॥

चुड, इ क छिदि। इति कविकल्पद्रुमः॥ ( चुरां-परं-सकं-सेट्।) इ क, चुण्डयति। इति दुर्गादासः॥

चुड, इ क रोषे। ( चुरां-परं-अकं-सेट्।) इ क, चुण्डयति। इति दुर्गादासः॥

चुड, इ ङ रोषे। ( भ्वां-आत्मं-अकं-सेट्।) इ, चुण्ड्यते। ङ, चुण्डते। इति दुर्गादासः॥

चुड्ड, ऌतौ। हावे। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-अकंच-सेट्।) टवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुड्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुण, शि छिदि। इति कविकल्पद्रुमः॥ ( तुदां-परं-सकं-सेट्।) शि, चुणति अचुणीत् चुचोण। इति दुर्गादासः॥

चुण्टा, स्त्री, (चुण्ट्यतेऽसाविति। चुण्ट छेदे+घञ्। मृत्तिकाखननेन जायमानत्वात्तथात्वम्।) कूपः। इति त्रिकाण्डशेषः॥

चुण्टी, स्त्री, कूपः। इति त्रिकाण्डशेषः॥ उपकूपम्। कूप समीपे स्वल्पजलाधारः। इति हेमचन्द्रः॥

चुत, इर् क्षरे। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-सेट्। अकं-इति केचित्।) इर्, अचुतत् अचोतीत्। क्षर इह आसेचनम्। चोतति घृतं वह्नौ यज्वा आसिञ्चतीत्यर्थः। इति दुर्गादासः॥

चुतः, पुं, (चोतति क्षरति मलशोणितादिर्यस्मात्। चुत+घञर्थे कः।) गुदद्वारम्। इति शब्दरत्नावली॥

चुतिः, स्त्री, ( चोतति क्षरति मलशोणितादिर्यस्याः। चुत+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) गुदद्वारम्। इति शब्दरत्नावली॥

चुद, क शुदि। इति कविकल्पद्रुमः॥ ( चुरां-परं-सकं-सेट्।) शुदि प्रेरणे। क, चोदयति वाणं चापः। इति दुर्गादासः॥

चुद्ड, ऌतौ। हावे। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-अकं च-सेट्।) तवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुद्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थः नायकादीनिति। चुद+कः। निपातनात् नुमागमः। ततः स्त्रियां ङीप्।) कुट्टनी। इति हेमचन्द्रः। ३। १९७॥

चुप, शनैर्गतौ। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-सेट्।) चोपति खञ्जः। चोपति दुष्टं राजा। इति रमानाथः। इति दुर्गादासः॥

चुब, इ कि चुम्बने। इति कविकल्पद्रुमः॥ ( चुरां-पक्षे भ्वां-परं-सकं-सेट्।) चुम्बनं मुखसंयोगः। इ, चुम्ब्यते। कि, चुम्बयति चुम्बति कान्ताधरं कामी। प्रियामुखं किम्पुरुषश्चुचुम्बे॥ इति व्यतीहारे आत्मनेपदम्। इति दुर्गादासः॥

चुब्रं, क्ली, ( चुम्ब्यतेऽनेनात्र वा। चुबि चुम्बने +"ऋचेन्द्राग्रेति।" उणां। २। २८। इति रप्रत्ययो नकारलोपश्च।) वदनम्। इत्युणादिकोषः॥

चुम्बकः, पुं, ( चुम्बति आकर्षति लौहमिति। चुम्ब+ण्वुल्।) कान्तलौहभेदः। तत्पर्य्यायः। कान्तपाषाणः २ अयस्कान्तः ३ लौहकर्षकः ४। अस्य गुणाः। लेखनत्वम्। शीतत्वम्। मेदोविषगरापहत्वञ्च। इति भावप्रकाशः॥ (विशेषोऽस्य कान्तलौहशब्दे ज्ञेयः॥) घटस्योर्द्धावलम्बनम्। इति मेदिनी। के, ८६॥

चुम्बकः, त्रि, ( चुम्बतीति। चुम्ब+ण्वुल्। चुम्बनपरः। धूर्त्तः। बहुग्रन्थैकदेशज्ञः। इति मेदिनी। के, ८६॥

चुम्बनं, क्ली, ( चुब इ कि चुम्बने+भावे ल्युट्।) मुखसंयोगः। चुमा इति भाषा॥ तस्य स्थानानि यथा, कामशास्त्रे।
"मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि।
गण्डे च कर्णयोश्चैव कक्षोरुभगमूर्द्धसु।
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह॥"

चुर, कि स्तेये। इति कविकल्पद्रुमः॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट्।) कि, चोरयति चोरति धनं चौरः। इति दुर्गादासः॥

चुरा, स्त्री, (चुर+बाहुलकात् कः। स्त्रियां टाप्।) चौर्य्यम्। इति शब्दरत्नावली॥

चुरी, स्त्री, ( चुर+कः। स्त्रियां ङीप्।) उपकूपम्। कूपसमीपस्थाल्पजलाधारः। इति हेमचन्द्रः। ४। १५६॥

चुलुकं, क्ली, ( चोलयतीति। चुल+बाहुलकात् उकञ्।) माषमज्जनजलम्। यथा। माषमज्जनजलमाचामं तच्चुलुकमिति मन्त्रोपनिषत्॥

चुलुकः, पुं, ( चोलयति उन्नतो भवतीति। चुल उन्नतौ+बाहुलकात् उकञ्।) घनपङ्कः। इति त्रिकाण्डशेषः॥ प्रसृतिः। भाण्डप्रभेदः। इति हेमचन्द्रः॥

चुलुकी, [ न् ] पुं, (चुलुक जलोन्नतिर्विद्यतेऽस्य। चुलुक+इनिः।) शिशुमाराकृतिमत्स्यः। इति शब्दरत्नावली॥ (यथा, वाभटे सूत्रस्थाने। ६। ५८।
"चुलुकी नक्रमकरशिशुमारतिमिङ्गिलाः।
राजीचिलिचिमाद्याश्च मांसमित्याहुरप्सुधा॥")

चुलुम्प, लोपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) अन्तःस्थतृतीयमध्यः। पञ्चमस्वरद्वयी। ओष्ठ्यवर्गशेषोपधः। चुलुम्पति। यगादौ चुलुम्प्यते इत्यादि। न तु नकारजावनुस्वारपञ्चमाविति स्वरसान्नप्रकृतित्वे यगादौ तल्लोप इति वाच्यम्। तर्हि नोपधस्यैव पठितुमुचितत्वात्। एवं सति अङ्कादीनां न प्रकृतित्वेऽपि ङमध्यपाठः कथमिति चेन्न। ते तु कस्यचिन्मते ङमध्या एवेति ज्ञापनाय ङमध्याः पठिताः। न च तर्हि इदित् पाठेऽपीष्टसिद्धिरिति वाच्यम्। क्विपि संयोगान्तलोपे इदित्पाठे चुलुन् चुलुम्प लोपे चुलुम् इति भेदात्। एवं सर्व्वत्र। इति दुर्गादासः॥

चुलुम्पः, पुं, ( चुलुम्प्यते इति चुलुम्पनमिति वा। चुलुम्प+भावे घञ्।) बाललालनम्। इति जटाधरः॥